M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 160

Title: Ananta Puja

160

:	Ananta Pooja	:	Title
:	:	:	Author
:	:	:	Editor
:	:	:	Year, Vols.
:	:	:	Publisher
160 :	:	:	Remarks

अनंतपूजाप्रारंभः

अ॰पू॰ श्रीगणेशायनमः॥अथानंतव्रतं॥तँच भाद्रपदशुक्लचतुर्दश्यामनंतव्रतेत्रिमुहूर्ता
व्योदयिकीग्राह्येतिमाधवः॥घटिकामात्राप्योदयिकीग्राह्येतिनिर्णयामृते॥
दिनद्वयेतथात्वेपूर्वा॥व्रतीप्रातरुत्थायगुरुंप्रणम्यतीर्थेस्नात्वापूजासंभारा
संपाद्यशुचौदेशेमंडपतोरणादिशोभाद्यंकृत्वातत्रमंडपेदेवस्यपूजार्थमासनं
परिकल्प्यस्वयंभार्यासहआसनेउपविश्याचम्यप्राणानायम्यदेशकालौसंकी
र्त्यअस्माकंसकुटुंबानांद्विपदचतुष्पदसहितानांक्षेमस्थैर्यआयुरारोग्यऐश्व
र्याभिवृध्यर्थंसमस्तमंगलावाप्त्यर्थंचतुर्विधपुरुषार्थसिध्यर्थंयथाज्ञानेन
यथामीलितोपचारद्रव्यैःपुरुषसूक्तमंत्रैःपौराणोक्तमंत्रैश्चषोडशोपचारैःपूजां
करिष्ये॥तथाचकरिष्यमाणानंतव्रतकर्मण्यधिकारार्थंशरीरशुध्यर्थंभूतशु
द्धिभूतशुद्धिप्राणप्रतिष्ठांतर्मातृकाबहिर्मातृकान्यासपुरुषसूक्तन्यासांश्च १
करिष्ये॥आसनादिकशाराधनंचकरिष्ये॥पृथ्वीतिमंत्रस्य मेरुपृष्ठऋषिःकूर्मो
× मोहिनीसहितश्रीमदनंतप्रीत्यर्थं×५

देवता सुतलंछंदः।आसनेविनियोगः॥पृथ्वित्वयाधृता॰पूजाकर्मसमारंभे॥
येभ्योमाताम धु॰म॰उक्थस्तुष्मानृ्द्वष॰एवापित्रे॰बृहस्पतेसुप्रजा॰।णा॥सह
स्रशीर्षेतिषोडशर्चस्य॰नारायणऋषिः।जगद्बीजपुरुषोदेवता अंत्यात्रिष्टुप्
शरीरशुध्यर्थंपुरुषन्यासेविनि॰॥ॐ सहस्रशीर्षा॰१वामकरायनमः॥ॐपुरुष
एवेदं॰२द॰राय॰ॐ एतावा॰३वामपादा॰ॐत्रिपादूर्ध्व॰४दक्षिणपादा॰ॐत
स्माद्विरा॰५वामजानवे॰ॐ यत्पुरुषेण॰६ दक्षिणजानवे॰ॐ तंयज्ञंबर्हि॰
७वामक॰ॐ तस्माद्यज्ञात्सर्वहुतःसंभृतं॰८ दक्षिणक॰ॐ तस्माद्यज्ञा॰
ऋचः॰९ नाभ्ये॰ॐ तस्मादश्वा॰१॰ हृदयाय॰ॐ यत्पुरुषंव्यदधुः॰११कंठा॰
ॐ ब्राह्मणोस्यमु॰१२ वामबाहवे॰ॐ चंद्रमामनसो॰१३दक्षिणबाहवे॰ॐ नाभ्याआ
सीदंत॰१४मुखाय॰ॐ सप्तास्यासन्प॰१५ नेत्राभ्यां॰ॐ यज्ञेनयज्ञमयजंत॰
१६ शिरसेन॰ॐ यत्पुरुषंव्यदधुः हृदया॰ॐ ब्राह्मणो॰शिरसेस्वा॰ॐ चंद्र॰

॰नत
२

शिरसेस्वा॰ ॐ नाभ्या आ॰ शिखायै॰ ॐ सप्तास्या॰ कवचायहुं॥ ॐ यज्ञेनयज्ञ॰
अस्त्रायफट्॥ कलशपूजनं॥ शंखपूजनं॥ घंटापूजनं॥ ॐ पवित्रःपवित्रोवा॰
पूजाद्रव्याणिप्रोक्ष्यात्मानंच संप्रोक्ष्य॥ तत्रादौयमुनापूजा॥ हृषीकेशंनम
स्कृत्ययमुनांपूजयेच्छुभे॥ सर्वव्रतसमारंभेयमुनांतुप्रपूजयेत्॥ व्रतादौकिंकृ
तंतत्रव्रतीकुर्यात्समलतः॥ कलशंनववस्त्रंचगंधपुष्पाक्षतादिभिः॥ गीतवा
द्यादिघोषैश्चगत्वानद्यांबुयलतः॥ स्नात्वाचम्यशुचौदेशेगोमयेनोलिप्यच
स्वस्तिकेःशंखपद्मैश्चरंगवल्यास्तुनिर्मितैः॥ निक्षिप्यतंदुलांस्तत्रचूतपल्ल
वसंयुतं॥ कलशंस्थापयेत्तत्रशुद्धतोयेनपूजयेत्॥ पंचरत्नानिनिक्षिप्यव
स्त्रमाछादयेत्ततः॥ गंधादिभिरलंकृत्ययमुनामर्चयेत्बुधैः॥ श्रीपरमे
श्व॰ र्थंकरिष्यमाणअनंतपूजांगत्वेनविहितंयथाज्ञानेनयथामीलितो २
पचारद्रव्यैः श्रीसूक्तमंत्रैःपुराणोक्तमंत्रैश्चषोडशोपचारपूजांकरिष्ये।
यमुना+

र्णवसंभूतेइंद्रनीलसमप्रभे॥ त्वत्प्रसादान्महादेवीविष्णुरूपेनमोस्तुते॥
श्रीयमुनायै॰ ध्यानं हिरण्यवर्णा॰ आदित्यदुहितेदेवी यमुनायैनमोस्तु
ते॥ त्रैलोक्यवंदितेदेवी यमज्येष्ठयशस्विनी॥ आवाहनं॥ ॐ तांमआव
ह॰ कृष्णवेणीनमस्तुभ्यंकृष्णवर्णेनमोस्तुते॥ सर्वसौभाग्यदेदेवीयमुना
येनमोस्तुते॥ आसनं॥ ॐ अश्वपूर्वां॰ देवपादेनमस्तुभ्यं सर्वलोक
हितप्रभे॥ सर्वपापप्रशमनी तुंगायैतेनमोस्तुते पाद्यं। ॐ कांसोस्मि
तां॰ कृष्णकृष्णांगसंभूतेजंतूनांपापहारिणी॥ नमस्तेसरितांश्रेष्ठेग्र
हाणार्घ्यंनमोस्तुते॥ अर्घ्यं ॐ चंद्रांप्रभासां॰ गरुडपादेनमस्तुभ्यंसर्व
लक्षणसंयुते॥ सर्वव्रतमयेदेवीभद्रायैतेनमोस्तुते॥ आचमनीयं।स
धर्मनिरतेदेवी ज्ञानमुक्तिप्रदायिनी॥ आत्मज्योतिमयेदेवी सर्वानुष्ठा

अनंत० ४

नकारिणी॥मधुपर्कं॥ततःपंचामृतस्नानं॥ॐ आदित्यवर्णे० विष्णुपादाब्जसंभू
तेगंगेत्रिपथगामिनी॥जटाजूटसमुद्भूते भागीरथ्यै नमोस्तु ते॥स्नानं॥श्री
सूक्तेन अभिषेकः॥ॐ उपैतु मां देव० गोदावरी नमस्तुभ्यं सर्वाभीष्टप्रदा
यिनी॥वस्त्रं च गृहाण मे देवी सर्वसंपत्प्रदे भव वस्त्रं ॐ क्षुत्पिपासा० कांच
नं राजतं सूत्रं ब्रह्मणा निर्मितं पुरा उपवीतं गृहाण त्वं यमुने भक्तवत्सले य
ज्ञोपवीतं माणिक्य मौक्तिकं नीलं पुष्करागसमन्वितं गोमेदं च वैडूर्यं रत्नालं कं०
रस्कशोभितं रत्नहारं मणिमुक्ताफलैर्हारैर्नूपुरैर्बाहुभूषणैः मुकुटैः
कुंडलैर्दिव्यैः सर्वाभरणभूषितैः आभरणानि ॐ गंधद्वारां दुरा० चंदना
गरुकस्तूरीमिश्रितं कुंकुमं तथा कर्पूरादिसमायुक्तं चंदनं प्रतिगृह्य
तां चंदनं कंठसूत्रं ताडपत्रं० सौभाग्यादिप्रदा० सौभाग्यद्रव्यं ४
अक्षताश्च सुरश्रेष्ठा० अक्षतां ॐ मनसः काममाकू० मंदारपा

रिजाताब्जैः केतकैः पाटलैः शुभैः मयाहृतानि पूजार्थं पुष्पाणि प्रतिगृ
ह्यतां पुष्पं अथांगपूजा ॐ चंचलायै० पादौ पू० ॐ चपलायै० जानुं पू०
ॐ कमलायै० कटिं पू० ॐ क्षमायै० नाभिं पू० मन्मथवासिन्यै० स्तनौ०
ललनायै० बाहुं पू० उत्कंठा० कंठं पू० श्रियै० मुखं० यमुनायै० ललाटं पू०
भागीरथ्यै० शिरः पू० अथ नामपूजा ॐ यमुनायै० भागीरथ्यै० हस्त
कलशायै० उत्पलायै० बलिपृष्ठायै० दारिद्र्यनाशिन्यै० विधात्र्यै०
सिंदूरचूडामण्यै० शिवायै० शंकरायै० गुणात्मन्यै० चतुःषष्टियोगि
न्यै० नर्मदायै० तुंगायै० भद्रायै० रुद्रायै० वेण्यै० भीमरथ्यै० ॐ क
र्दमेन० वनस्पतिरसो० धूपं आपः स्रजंतु० आज्यं च वर्ति० दीपं०
आर्द्रां यः करिणीं० अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितं भ

अनंत. क्षभोज्यंसमायुक्तंनैवेद्यंप्रतिगृह्यतां नैवेद्यं पानीयंपावनंश्रेष्ठंकर्पूरप
९ रिवासितं भक्त्यानिवेदितंदेवीपानीयंप्रतिगृह्यतां मध्येपानीयं उत्त
रापोशनं पूगीफलमितितांबूलं हिरण्यगर्भेतिदक्षिणा इदंफलमिति
फलं चक्षुर्दंसर्वलोकानां॰ नीराजनं आर्द्रांपुष्करिणीं॰ इमंमेगंगे
यमुनेसरस्वति॰ अस्ति॰ मया मंत्रपुष्पं ॐतांमआवह॰ यानिकानि
चपा॰ प्रदक्षिणा पापोहंपापकर्माणांपापात्मापापसंभव त्राहिमांकृ
पयागंगेयमुनायैनमोस्तुते नमस्कारान् आवाहनंनजा॰ रूपं
देहि॰ यस्यस्मृत्याचना॰ अनेनयथाकृतपूजनेन तेनश्रीयमुनादेव
ताः प्रीयतांनमम अथानंतपूजा अनंताराधनंकुर्यात्पूर्ण ९
कुंभंसचैलकं स्नात्वानीतं ततःकृत्वादेवदर्भमयंशुभं फणिभिः

सप्तभिर्युक्तंपूजास्थानंसमाश्रयेत् उपलिप्यततःकृत्वापद्ममष्ट
दलंलिखेत् अनंतोदेवेतिमंत्रेणतत्सद्ममभिमंत्रयेत् कृत्वादर्भम
यंदेवंवरानिधिसमप्रभं फणासप्तयुतेपीठेपिंगलाख्यंचतुर्भुजं
दक्षिणस्यकरेपद्मं शंखंतस्याप्यधःकरे चक्रमूर्ध्वकरेवामेगदा
गरुडशोभितं ॐनमोभगवतेवासुदेवायनमस्कृत्यचतुर्भुजं
ततःकलशोपरिपूजापात्रंसंस्थाप्यकुंकुमेनाष्टदलंविलिख्यानंत
स्थापनदेशेसंस्थाप्य पीठपूजांकुर्यात् पीठमध्ये ॐपरमदेवता
यै॰ सर्वगुरुभ्यो॰ दक्षिणे सर्वदेवताभ्यो॰ आग्नेय्यां गरुडाय॰ नैरृ
त्यां ॐव्यासाय॰ वायव्यां ॐदुर्गायै॰ ईशान्यां ॐसरस्वत्यै॰ आग्ने
य्यां ॐधर्माय॰ नैरृत्यां ॐज्ञानाधिपतये॰ वायव्यां ॐवैराग्याधि

अनं॰पू॰ पतये॰ ईशान्यां ॐ ऐश्वर्याधिपतये॰॥ अष्टादिक्षु॥ इंद्राय॰ अग्नये॰ यमाय॰ नि
६ ऋतये॰ वरुणाय॰ वायवे॰ सोमाय॰ ईशानाय॰ आग्नेय्यां गणपतये॰ नैर्ऋत्यां दु
र्गायै॰ वायव्यां क्षेत्रपालाय॰ ईशान्यां वास्तोष्पतये॰ मध्ये परमपुरुषाय॰ आ
धारशक्तये॰ कूर्माय॰ अनंता॰ पृथिव्यै॰ क्षीरसमुद्राय॰ श्वेतद्वीपा॰ रत्नमं
डपाय॰ पद्मा॰ श्रियै॰ दुर्गायै॰ भूम्यै॰ पद्मदलेषु दशकलात्मने वह्निमंडला
य॰ द्वादशकलात्मने सूर्यमंडलाय॰ षोडशकलात्मने सोममंडलाय॰ प
द्मस्य पूर्वपत्रे ॐ आं आत्मने॰ पं परमात्मने॰ अं अंतरात्मने॰ ज्ञां ज्ञाना
दि त्मने॰ पूर्वादिक्षु विमलायै॰ उत्कर्षिण्यै॰ ज्ञानायै॰ क्रियायै॰ योगायै॰ प्र
ह्व्यै॰ सत्यायै॰ ईशानायै॰ अनुग्रहायै॰ हरेर्योगपीठेश्वररूपिणे मोहिनी सहि
तश्रीमदनंताय नमः अथ शेषपूजां कुर्यात् श्री॰ थं करिष्यमाणश्री ६

नाममंत्रेण

मदनंतपूजांगत्वेन षोडशोपचारैः शेषपूजां करिष्ये फणाः सप्तसमायुक्तो धरित्र्यां
वाहनोनलः मस्तके मणिभूषाद्यो पन्नगाय नमोस्तु ते शेषाय नमः ध्यानं शेषा
य॰ आवाहनं ॐ कुलिशा॰ आसनं ॐ तक्षकाय॰ पाद्यं ॐ अजगराय॰ अर्घ्यं
ॐ पंनगाय॰ आचमनं ॐ वासुकिने॰ स्नानं ॐ सर्पाय॰ वस्त्रं ॐ कालिकाय॰ चं
दनं ॐ सहस्रफणये॰ पुष्पं ॐ कर्कोटका॰ धूपं ॐ आस्तिकाय॰ दीपं ॐ वस्कं
धराय॰ नैवेद्यं ॐ हिरण्यरूपा॰ तांबूलं ॐ विश्वरूपाय॰ दक्षिणां ॐ अनंतमू
र्तये॰ नीराजनं ॐ सर्वमूर्तये॰ मंत्रपुष्पं आवाहनं न जानामि॰ अनेन पूजने
न शेषः प्रीयतां मूलमंत्रेण न्यासं कुर्यात् ॐ नमो भगवते वासुदेवाय अं
गुष्ठाभ्यां॰ ॐ नमो भगवते॰ तर्जनीभ्यां॰ ॐ नमो भग॰ मध्यमा॰ ॐ
नमो भ॰ अनामि॰ ॐ कनिष्ठिका॰ ॐ करतलकरपृष्ठा॰ एवं हृदया
दि देहांगन्यासं कुर्यात् ॐ केशवाय नमः शिरसि ॐ नाराय॰ मुखे ॐ

ॐ माधवा० भुजयोः ॐ गोविंदा० कंठे ॐ विष्णवे० पृष्ठे ॐ मधुसूदना० कुक्षौ ॐ
त्रिविक्रमा० कट्यां ॐ वामना० जंघयोः ॐ श्रीधराय० गुह्ये ॐ हृषीकेशा
य० अपाने ॐ पद्मनाभा० वामपादे ॐ दामोदरा० दक्षिणपादे प्राणप्र
तिप्रतिष्ठां कुर्यात् अद्ये० श्रीपरमेश्वरप्रीत्यर्थं मोहिनीसहितश्रीम
दनंतरूपी दोरके देवतासांनिध्यार्थं प्राणप्रतिष्ठापनं करिष्ये अस्य श्रीप्राण
प्रतिष्ठामंत्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः ऋग्यजुःसामाथर्वाणि छंदांसि प
राप्राणशक्तिर्देवता आं बीजं ह्रीं शक्तिः क्रों कीलकं मोहिसहितश्रीमद नी
नंतरूपी दोरकस्य प्राणप्रतिष्ठापने० ॐ आं ह्रीं क्रों अं कं खं गं घं ङं पृथिव्य
प्तेजोवाय्वाकाशात्मने आं अंगुष्ठाभ्यां० ॐ आं ह्रीं क्रों इं चं छं जं झं ञं शा ८
ब्दस्पर्शरूपरसगंधात्मने ईं तर्जनीभ्यां० ॐ आं ह्रीं क्रों उं टं ठं डं ढं णं श्रो
त्रत्वक्चक्षुजिह्वाघ्राणात्मने ऊं मध्यमाभ्यां० ॐ आं ह्रीं क्रों एं तं थं दं धं

नं वाक्पाणिपादपायूपस्थात्मने ऐं अनामिकाभ्यां० ॐ आं ह्रीं क्रों ॐ पं फं बं भं मं
वचनादानगमनविसर्गानंदात्मने औं कनिष्ठिकाभ्यां० ॐ आं ह्रीं क्रों अं यं रं लं
वं शं षं सं हं ळं क्षं मनोबुध्यहंकारचित्तविज्ञानात्मने अः करतलकरपृष्ठाभ्यां० ए
वं हृदयादि ॐ आं ह्रीं क्रों अं यं रं लं वं शं षं सं हं ळं अः क्रों ह्रीं आं हंसः सोहं मोहिनी
सहितश्रीमदनंतरूपी दोरकस्य प्राणा इह प्राणाः पुनरपि जीव इह स्थितः पुन
रपि सर्वेंद्रियाणि वाङ्मनश्चक्षुः श्रोत्रत्वक्जिह्वाघ्राणपाणिपादपायूपस्थ इहैवा
गत्य स्वस्तये सुखं चिरं तिष्ठंतु स्वाहा असुनीते पुनरस्मासु चक्षुः पुनः प्राण
मिह नो धेहि भोगं। ज्योक्पश्येम सूर्यमुच्चरंतमनुमते मृळया नः स्वस्ति॥
गर्भाधानादि पंचदश संस्कारसिध्यर्थं पंचदशप्रणवावृत्तीः करिष्ये ॐ १५
रक्तांभोधिस्थपोतोल्लसदरुणसरोजाधिरूढा कराब्जैः पाशं कोदंडमि
क्षूद्भवमथ गुणमप्यंकुशं पंचबाणान् बिभ्राणा सृक्कपालं त्रिनयनलसि

अनंत तापीनवक्षोरुहाढ्यादेवी बालार्कवर्णाभवतुस्करवकरीप्राणशक्तिः
८ परा नः अथध्यानं दिव्याष्टुधध्धरं देवं दिव्यांबरसमन्वितं अनं
तमच्युतं देवं नारायणमनामयं फणाःसप्तान्वितानं तोपिंगलाक्षंचतु
र्भुजं दक्षिणोर्ध्वकरेपद्मं शंखं तस्याप्यधःकरे चक्रमूर्ध्वकरेवामेगदां
चाधःप्रकीर्तितः नवाम्रपल्लवाभासंपिंगश्मश्रुलोचनं पीतांब
रधरं देवं विश्वरूपं विचिंतयेत् मोहिनीसहितश्रीमदनंतायसांगा
यसपरिवारायनमः ध्यानं ॐ सहस्रशीर्षा० आगच्छानंतदेवेश
तेजोराशिजगत्पते इमांमयाकृतांपूजांगृहाणस्करसत्तम। आ
वाहनं ॐ पुरुषएवेदं० अनंतायनमस्तुभ्यं सहस्रशिरसेनमः लो ८
कनाथनमस्तेस्तुनागाधिपतयेनमः आसनं ॐ एतावानस्य०

पाद्यंगृहाणदेवेशगंधपुष्पाक्षतैःसह कुशोदकसमायुक्तंप्रीत्यर्थंप्रतिगृह्य
तां पाद्यं ॐ त्रिपादूर्ध्व० अनंतानंतदेवेशअनंतफलदायक अनंतमूर्तिवि
श्वात्मा अर्घ्यं गृहाण नमोस्तुते अर्घ्यं ॐ तस्माद्विरा० गंगाजलसमानी
ल तं स्कवर्णकलशस्थितं गृहाणाचमनं देवभागीरथ्युदकेनच आचमनं ॐ म
धुवाताऋता० रविष्टरादिगवांक्षीरं मधुपर्कसमन्वितं गृह्योक्तवेदविधि
नाजगदानंददायक मधुपर्कस्नानं ॐ यत्पुरुषेणहवि० नर्मदागौतमीकृ
ष्णागंगागोदासमन्वितं स्नानार्थमुदकं दत्तं प्रीत्यर्थंप्रतिगृह्यतां स्नानं
ततःपंचामृतैःस्नपयिष्ये ॐ आप्यायस्वस० पयस्नानं ॐ दधिक्राव्णो०
दधिस्नानं ॐ घृतंमिमिक्षे० घृतस्नानं ॐ मधुवाताऋतायते० मधुस्ना
नं ॐ स्वादुःपवस्वदिव्या० शर्करास्नानं ॐ गंधद्वारांदुर्धर्षां० गंधोद
कस्नानं गंधादिपंचोपचारैः संपूज्य ततःपुरुषसूक्तेनविष्णुसूक्तेन

श्रीसूक्तेनाभिषेकः देवस्यत्वासवितुः० अभिषेकस्नानानंतरं आचमनी
यं दर्भमयफणासप्तान्वितस्थापितशेषस्योपरिमोहिनी सहितश्रीमदनंतंस्था
पयेत् ॐ नमोभगवतेवासुदेवाय मोहिनी सहितश्रीमदनंतं सांगंस
परिवारंसायुधंसशक्तिकं अस्मिन्पीठेस्थापयामि तदस्तुमित्रावः० गृहा
वैप्रतिष्ठा० प्रतिष्ठाप्रतिष्ठा नर्यप्रजांमेगोपाय० आग्नेयादिचतुष्कोणे
षु ॐ गणपतये० सप्तमातृभ्यो० दुर्गायै० क्षेत्राधिपतये० वास्तोष्पतये० पू
र्वाद्यष्टदिक्षु ॐ इंद्रायनमः इंद्रं आवाहयामि अग्निं· यमं· निर्ऋतिं· वरुणं०
वायवे· सोमाय· ईशानाय· तत्त्वन्मंत्रैरावाह्य ॐ तंयज्ञंबर्हिषि० नानाभरण

शोभाढ्यानानालंकारशोभितं गृहाणभरणंदेवअनंतानंतदायक व ९
स्त्रं ॐ तस्माद्यज्ञात्स० दामोदरनमस्तुभ्यंत्राहिमांभवसागरात् ब्रह्मसू
त्रंसोत्तरीयंगृहाणसुरसत्तम यज्ञोपवीतं नानाभरणशोभाढ्यानानालं

कारशोभितं गृहाणभरणंदेवअनंतानंतदायक आभरणानि ॐ तस्मा
द्यज्ञात्स० ऋचः० श्रीखंडचंदनं० चंदनं अक्षतारजनी चूर्णमिश्रिताश्वेत
तंदुलाः मयार्पितागृहाण त्वंसर्वसिद्धिप्रदायक अक्षताश्च स्० अ
क्षतान् ॐ तस्मादश्वा अ० माल्यादीनिस्रग० करवीरैर्जाति० पुष्पाणि अ
लिरिवभोगैः० परिमलद्रव्यं वनमालांस्र गंधाढ्यांनानापुष्पैःसमन्वितं पू
जार्थंसाधितांदेवप्रीत्यर्थंप्रतिगृह्यतां वनमाला अथांगपूजा ॐ मत्स्या० पा
दौपू० कूर्माय० गुल्फौपू० वराहाय० जानुद्वयंपू० नारसिंहा० ऊरुद्वयंपू०
वामनाय० कटिद्वयंपू० परशुरामा० उदरंपू० श्रीरामा० हृदयंपू० श्रीकृ
ष्णा० मुखंपू० श्रीमदनंता० शिरः पूजयामि अथावरणदेवताः ॐ अनंतस्य
दक्षिणपार्श्वे रामाय० वामपार्श्वे भूम्यै० दयाब्धेत्राहिसंसारभक्तान्मांशरणा
गतं भक्त्यासमर्पयेत्वाहं प्रथमावरणार्चनं ॥ आवरणपूजनेन श्रीमदनंतः प्री
प्रथम

अनं.पू. यतां एवंसर्वत्र पूर्वादिदिक्षु ॐ कुल्योल्काय० महोल्का० घल्काय० वीरोल्का०
१० दया० द्वितीयावरणं २ पूर्वे वासुदेवा० आग्नेये संकर्षणा० दक्षिणे प्रद्युम्नाय०
नैर्ऋते अनिरुद्धा० दयाब्धेत्रा० तृतीयावरणं ३ प्राच्यां केशवाय० नारायणा०
आग्नेयां माधवा० दक्षिणे. गोविंदा० विष्णवे० नैर्ऋते मधुसूदना० पश्चिमे त्रिवि
क्रमा० वामना० वायव्यां श्रीधराय० उत्तरे हृषीकेशा० पद्मनाभाय० ईशान्यां दा
मोदरा० दयाब्धेत्रां० चतुर्थावरणार्चनं ४ प्राच्यां मत्स्याय० कूर्माय० आग्नेय्यां
वराहा० दक्षिणे नारसिंहा० वामनाय० नैर्ऋत्ये परशुरामा० पश्चिमे रामा० कृ
ष्णाय० वायव्यां बौद्धा० उत्तरे कल्किने० ईशान्यां अनंताय० द[illegible]याब्धे०
पंचमावरणं ५ पूर्वे अनंताय० दक्षिणे ब्रह्मणे० पश्चिमे वरुणाय० उत्तरे सो
मायः दयाब्धेत्रा० षष्ठावरणं ६ आग्नेय्यां वारुण्ये० नैर्ऋत्यां गायत्र्ये० वा १०
यव्यां भैरव्ये० ईशान्यां गिरिजाये० दयाब्धेत्रा० सप्तमावरणं ७ पूर्वे इंद्रा द्य

ष्टदिक्षु इंद्राय० अग्नये० यमा० निर्ऋतये० वरुणाय० वायवे० सोमा० ईशाना० दयाब्धे०
अष्टमावरणं ८ आग्नेय्यां शेषाय० नैर्ऋत्ये विष्णवे० वायव्यां विधये० ईशान्यां प्र
जापतये० दयाब्धेत्रा० नवमावरणं ९ आग्नेय्यां गणपतये० नैर्ऋत्यां सप्तमातृभ्यो०
वायव्यां दुर्गाये० ईशान्यां क्षेत्रपाला० दयाब्धे० दशमावरणं १० ब्रह्मणे० भास्करा०
शेषाय० सर्वव्यापिने० ईशाना० विश्वरूपा० महाकायाय० सृष्टिकर्त्रे० कृष्णा० विष्ण
वे० हरये० शिवाय० सृष्टिकरा० अनंतकारकाय० दयाब्धेत्रा० एकादशावरणं ११
अनघाय० वामनाय० शौरये० वैकुंठाय० पुरुषोत्तमा० पद्मनाभाय० हृषीकेशाय० मा
धवाय० मधवाय० मधुसूदना० अच्युताय० अनंताय० गोविंदाय० अपराजिता०
श्रीकृष्णा० दयाब्धेत्रा० द्वादशावरणं १२ अनंतात्मजा० गोविंदाय० कपिला०
शेषाय० संकर्षणाय० हलायुधाय० ताराय० सीरपाणये० बलभद्राय० दयाब्धे
त्रा० त्रयोदशावरणं १३ क्षीराब्धिशायिने० अच्युताय० भूमिधरा० लोकनाथा०

फणामणिभूषिता॰ सहस्रमूर्ध्ने॰ सहस्रार्चिषे॰ केशवाय॰ नारायैंदिचतु णा
विंशतिनामानि दयाब्धेत्रा॰ चतुर्दशावरणं १४ अथपत्रीपूजा ॐ कृष्णाय॰
पलाशपत्रं विष्णवे॰ उदुंबरपत्रं हरये॰ अश्वत्थपत्रं भास्करा॰ अशोकपत्रं
शेषाय॰ कपित्थपत्रं सर्वव्यापिने॰ वटपत्रं ईश्वारा॰ ब्राह्मिपत्रं विश्वरू
पा॰ कदलीपत्रं महाकाला॰ अपामार्गपत्रं सृष्टिकर्त्रे॰ पुंनागपत्रं अनं
करा॰ नागपत्रं विश्वमूर्तये॰ अर्जुनपत्रं परमात्मने॰ जातीपत्रं पद्मना
भाय॰ करवीरपत्रं १४ पुष्पपूजा अनंताय॰ पद्मपुष्पं विष्णवे॰ जातीपुष्पं
केशाय॰ चंपकपु॰ अच्युता॰ कल्हारपु॰ सहस्रजिते॰ केतकीपुष्पं
अनंतरूपिणे॰ बकुलपुष्पं इष्टाय॰ शतपत्रपु॰ विशिष्टाय॰ पुंनागपु॰
शिष्टाय॰ करवीरपु॰ शिखंडिने॰ धत्तूरपुष्पं नहुषाय॰ नंदवर्धनपु॰

विश्वबाहवे॰ मल्लिकापु॰ महीधराय॰ मालतीपु॰ अच्युताय॰ कर्णिका
पुष्पं ततः नानापुष्पैः तुलसीपत्रैश्चपूजयेत् अथनामपूजा ॐ अनघा॰
वामना॰ शौरये॰ वैकुंठाय॰ पुरुषोत्तमा॰ पद्मनाभा॰ हृषीकेशाय॰ माधवा॰
मधुसूदना॰ अच्युताय॰ अनंता॰ गोविंदा॰ कृष्णाय॰ अपराजिता॰ अ
थचतुर्दशग्रंथिपूजा ॐ कालरूपा॰ प्रथमग्रंथिंपूजयामि विष्णवे॰
द्वितीयग्रंथिं॰ हरये॰ तृतीयग्रंथिं॰ शिवाय॰ चतुर्थग्रंथिं॰ ब्रह्मणे॰ पंचम
ग्रंथिं॰ भास्करा॰ षष्ठग्रंथिं॰ शेषाय॰ सप्तमग्रंथिं॰ सर्वव्यापिने॰
अष्टमग्रंथिं॰ ईश्वाराय॰ नवमग्रंथिं॰ विरूपाक्षा॰ दशमग्रंथिं॰ महात्मने॰ ए
कादशग्रंथिं॰ सृष्टिसंहारका॰ द्वादशग्रंथिं॰ सृष्टिकारा॰ त्रयोदशग्रंथिं॰
श्रीमदनंता॰ चतुर्दशग्रंथिंपूजयामि १४ मोहिन्यै॰ १ श्रियै॰ २ पद्मिन्यै॰ ३
महाबला॰ ४ अक्षयायै॰ ५ वरदा॰ ६ मंगला॰ ७ शुभायै॰ ८ अपरा
जिता॰ ९ भगवत्यै॰ १० जयायै॰ ११ सुभद्रा॰ १२ सुभगा॰ १३ श्रीम

शालक्ष्ये॰१४ इति ग्रंथिपूजा नमस्ते भगवन्विष्णो नमस्ते धरणीधर न
मस्ते सर्वनागेंद्र सर्पराज। नमोस्तु ते॥ अनंताय नमस्तेस्तु सहस्रशिरसे
नमः नमोस्तु पद्मनाभाय नागाधिपतये नमः अनंत कामान्मे देहि स
र्वकामफलप्रद अनंत देवरूपेण पुत्रपौत्रप्रदायक इति नमस्कारः अ
थाष्टोत्तरशतं अश्रीमदनंताष्टोत्तरशतनाममंत्रस्य गौतमऋषिः
सच्चिदानंतपरब्रह्म श्रीमदनंतोदेवता अनुष्टुप्छंदः श्रीमदनंतप्री
त्यर्थं नामामृतमंत्रैः पूजने विनियोगः ॐ अनंताय॰ अच्युताय॰ अ
द्भुतकर्मणे॰ अमितकर्मणे॰ अमितविक्रमाय॰ अपराजिताय॰
अखंडतत्वरूपाय॰ अग्निनेत्राय॰ अग्निवपुषे॰ अदृश्याय॰ अट्टहा
साय॰ अत्रिपुत्राय॰ अनुकूलाय॰ अघनाशिने॰ अनघाय॰ अप्सु
निलयाय॰ अरुरणाय॰ अष्टमूर्तये॰ अनिरुद्धाय॰ अनिर्विण्णा॰

अचंचलाय॰ अब्दादिकालरूपाय॰ अखिलाधाराय॰ अव्यक्ताय॰
अन्नरूपाय॰ अभयंकराय॰ अक्षराय॰ अभ्रवपुषे॰ अयोनिजा॰
अरविंदाक्षाय॰ अज्ञानवर्जिता॰ अधोक्षजाय॰ अदितिपुत्राय॰ अं
बिकापतिपूर्वजाय॰ अपस्मारनाशिने॰ अव्ययाय॰ अन्नदाय॰ अ
प्रमेयाय॰ अघशत्रवे॰ अमरप्रियाय॰ अनीश्वराय॰ अहिर्बुध्न्याय॰
अजाय॰ अघोराय॰ अनादिनिधनाय॰ अमरप्रभवे॰ अप्रमेयाय॰
अनामयाय॰ अमेयात्मने॰ अमोघविक्रमाय॰ अघापहर्त्रे॰ अमोघ
कल्याणगुणसंश्रयाय॰ अमरप्रभवे॰ अगात्थाय॰ अक्रूराय॰ अनुत्त
माय॰ अरूपाय॰ अन्नेन॰ अमोघाय॰ अजाय॰ अक्षयाय॰ अमृता॰
अखिवीर्याय॰ अव्यंगाय॰ अविघ्नाय॰ अतींद्रियाय॰ अमिततेजसे॰
अष्टांगरूपा॰ अनिलाय॰ अबंराय॰ अणोरणीया॰ अशोकाय॰ अरविं

दाय० अनुकूलाय० अनिर्देश्यवपुषे० अहोरात्राय० अमत्स्यवे० अकारादि
हकारांताय० अनिमिषाय० अस्त्ररूपाय० अग्रण्याय० अप्रथिताय० अ
संख्याय० अमरवंद्याय० अंनपतये० अमृतप्रियाय० अधिष्ठाय० अर
विंदप्रिया० अरविंदपेन० अद्भुवपित्रे० अनयाय० अर्थाय० अक्षोभ्या०
अर्चिष्मते० अनेकमूर्तये० अनंतब्रह्मांडपतये० अनंतशायनाय० अनं
तब्रह्मांडसंरक्षणायनमः १०८ इत्यष्टोत्तरशतानिनामानि ॐ यत्पुरुषंव्यद०
वनस्पतिरसो० धूपं ॐ ब्राह्मणोस्य० आज्यंचवर्तिसं० दीपं ॐ चंद्रमा
मनसो० परमान्नंचपक्वान्नंघृतशर्करसंयुतं नानाशाकैः सभक्ष्यंचष
ड्रसान्नं समर्पितं नैवेद्यंगृह्यतांदेव० ईप्सितंमे० शर्करखंड० आहारभ० १३
नैवेद्यं उदकुंभंप्रदास्यामिशोभनंशीतलोदकं उशीरमृगसंयुक्तंकर्पूरे
श्चंदनैर्युतं मध्येपानीयं ॐ स्वादुःपवस्वदि० उत्तरापोशनं हस्तप्रक्षालनं

मुखप्रक्षालनं मलयाचलसंभूतंघनसारंमनोहरं हृदयानंदनं चारु चंदनंप्र
तिगृह्यतां करोद्वर्तनं कर्पूरेलालवंगादिक्रमुकीफलसंयुतं नागवल्यादलैर्यु
क्तं तांबूलंप्रतिगृह्यतां तांबूलं नानाफलसमश्रेष्ठंपुत्रपौत्रप्रवर्धनं सर्वै
श्वर्यकरंनित्यंमनंतफलदायकं इदंफलमितिफलं हिरण्यगर्भेतिदक्षि
णा ॐ श्रियेजातः श्रियआ० श्रियएवेनंतछ्रियामा० घृतवर्तिसमायु
क्तंमहातेजोमयंज्वलं अज्ञानमंधकारंचनिवारयतुमेसदा महानीरा
जनं हरिशंखगदाकमलांकितयुगुलंसुवनत्रयपरिरक्षणकृतेनाना
लीलं घृतकुंडलवलयांगदनूपुरसमयुगुलंवंदेविष्णुंसदयंईप्सितघन
लीलं जयदेवजयदेवजयनिरवधिकीर्तीशिवहरिरविगणपतिजगदंबा
भिधमूर्ते जयदेवजयदेव ॐ नाभ्याआसीदं० नमोमहद्भ्यो० ममेत्तु

कथाते॰ यत्तेनय॰ पराश्रुभ्या॰

 नः॰ ॐ त्वेरायइंद्र॰ उभाशंसानर्या॰ उतनईमरुतो॰ त्वस्याम॰ दिवश्चिदाते॰
 शंसामहा॰ त्रिरुत्तमादू॰ नापाभूत॰ अप्रतीतो॰ कोवस्त्राता॰ त्वमंपायद॰
मूर्धानंदिवो॰ नासिंयज्ञानां॰ तेनोरायो॰ येकेचज्मामहि॰ अस्मेरुद्राभिरु॰ परि
प्रधन्वेंद्राय॰ प्रयाजान्मे अनु॰ ऐभिर्दद्देव॰ अनक्षरा॰ गभ्णामिते॰ समस्मि
ञ्जाय॰ ब्रह्मचारीचर॰ सद्योजातो॰ इदंतेपात्रंस॰ गणानांत्वा॰ जातवेदसे॰
त्र्यंबकंयजामहे॰ वषट्तेविष्णो॰ राजाधिराजा॰ साम्राज्यं॰ तदप्येष॰ मं
त्रपुष्पं ॐ सप्तास्यासन्परि॰ यानिकानीतिप्रदक्षिणा ॐ यज्ञेनयज्ञम॰
साष्टांगोयंप्रणामस्तेप्रयत्नेनमयाकृतं दासोहमितिमांमत्वाक्षमस्व
परमेश्वर नमोस्त्वनंताय॰ नमस्कारान् सर्वपापहरोनंतत्राहिमांभवसा १४
गरात् भुक्तिमुक्तिप्रदंनृणांशरीरारोग्यसंपदां अनंतसंसारमहासमु

द्रेमग्नंसमभ्युद्धरवासुदेव अनंतरूपीविजयोजयस्व अनंतसूत्रायनमो
नमस्ते आवाहनंनजा॰ मंत्रहीनं॰ यस्यस्मृत्या॰ रूपंदेहिजयंदेहि॰ इति
प्रार्थना यन्मयामंत्रसंयुक्तंपत्रपुष्पफलंजलं निवेदितंचनैवेद्यंप्रीत्यर्थं
प्रतिगृह्यतां पूजानिवेदनं छत्रं चामरं दर्पणं मंचकं व्यंजनं नृत्तगीत
दिवाद्यादिपुराणपठनादिभिः राजोपचारैरखिलैः संतुष्टोममसर्वदा छत्रा
दिराजोपचारान्समर्पयामि मत्समोनास्तिपापिष्ठस्त्वत्समोनास्तिपापहा इति
संचिंत्यदेवेशयथेच्छसितथाकुरु अनेनयथाज्ञानेनयथामीलितोपचारद्रव्ये
णयत्कृतपूजनेनतेनश्रीमोहिनीसहितश्रीमदनंतःप्रीयंतांनमम अथदो
रकग्रहणं स्वीकरोमिशुभंसूत्रंममविज्ञानदोभव दोररूपेणमांरक्षपुराणपुरु
षोत्तम अनंतंसर्वदेवेशंभुक्तिमुक्तिप्रदायकं अनंताख्यमिदंसूत्रंधारयामि
तवप्रियं दोरकबंधनेमंत्रः संसारगह्वरगुहासुसुखंविहर्तुंवांछतियेकुरु

अनंतपू॰ कुलोद्भवश्वशुरस्य सत्वाः संपूज्य च त्रिभुवने त्वामनंतदेव बध्नंति दक्षिणकरे व
१९ रदोरकं ते अथ जीर्णदोरकोत्तारणं जीर्णदोरकस्य षोडशोपचारैः पूजां कृ
त्वा प्रसन्नार्घ्यं दद्यात् अनंतानंत देवेश अनंतफलदायक अनंतानं
तसर्वेश गृहाणार्घ्यं नमोस्तु ते अर्घ्यं नमस्ते देवदेवेश नमस्ते धरणीध
र नमस्ते सर्वनागेंद्र नमस्ते ज्योतिषांपते नमस्कारान्। न्यूनातिरिक्ता
नि परिस्फुटानि यानीह कर्माणि मया कृतानि क्षम्याणि चैतानि मम क्षमस्व प्रया
हि तुष्टः पुनरागमाय इति जीर्णदोरकविसर्जनं ब्राह्मणाय दोरकदानं
अद्ये० श्रीपरमेश्वरप्रीत्यर्थं ब्राह्मणाय मोहिनी सहित श्रीमदनंत जीर्ण
दोरकदानं करिष्ये ब्राह्मणं संपूज्य स्वस्त्यस्तु दीर्घमायुः० प्रतिगृह्य द्वि १९
जश्रेष्ठ अनंतफलदायक त्वत्प्रसादादहं मुच्ये संसारकर्मबंधनात् अनं
तः प्रतिगृह्णाति अनंतो वै ददाति च अनंतस्तारकोभाभ्यां अनंतायन

मोनमः इदं जीर्णदोरकदानं मोहिनी सहित श्रीमदनंतप्रीतये अमुकशर्मणे
ब्राह्मणाय तुभ्यमहं संप्रददे प्रतिगृह्यतां प्रतिगृह्णामीति ब्राह्मणः अने
न जीर्णदोरकदानेन सदक्षिणाकेन सतांबूलेन श्रीमदनंतः प्रीयतां ॥
अद्ये० श्रीपरमेश्वरप्रीत्यर्थं ततः सांगतासिध्यर्थं चतुर्दशसंख्याकानि चतुर्दश
अपूपवायनानि एकं वा दद्यात् पूर्वो० त्यर्थं पूजा सांगतासिध्यर्थं श्रीमद
नंतप्रीत्यर्थं ब्राह्मणाय चतुर्दश संख्याक अपूपवायनदानं करिष्ये
ब्राह्मणं संपूज्य स्वस्त्यस्तु दीर्घमायुः० प्रियतामिति उपायनमिदं
तुभ्यं व्रतसंपूर्णहेतवे वाणकं द्विजवर्याय सहिरण्यं ददाम्यहं इदं च
तुर्दशसंख्याक अपूपवायनं दानं श्रीमदनंतप्रीतये अमुकशर्मणे ब्राह्मणा
य तुभ्यमहं संप्रददे न मम शक्त्यानुसारेण ब्राह्मणसुवासिनी समाराधनं कृ
त्वा भूयसीं दक्षिणां दद्यात् स्वहस्ते सह मिष्टान्नं भुंजीत इत्यनंतव्रतसमाप्तं ॥

अनं.पू. ॐ श्रीकृष्णाय० कमलानाथा० वासुदेवा० सनातना० वसुदेवात्मजा०
१६ पुण्याय० लीलामानुषविग्रहा० श्रीवत्सकौस्तुभधरा० यशोदावत्सला
य० हरये० चतुर्भुजात्तचक्रासिगदाशंखाद्युदायुधाय० देवकीनंदना० श्री
शा० नंदगोपप्रियात्मजा० यमुनावेगसंहारिणे० बलभद्रप्रियानुजा० पूतनाजीवि
तहरा० शकटासुरभंजना० नंदव्रजजनानंदाय० सच्चिदानंदविग्रहाय० नवनी
तविलिप्तांगाय० नवनीतनटाय० अनघाय० नवनीतनवाहाराय० मुचकुंद
प्रसादकाय० षोडशस्त्रीसहस्रेशाय० त्रिभंगिने० ललिताकृते० शुकवागमृ क
ताब्धिंदवे० गोविंदाय० योगिनांपतये० वत्सपालकसंचारिणे० धेनुकासुरभं
जनाय० तृणीकृततृणावर्ताय० यमलार्जुनभंजनाय० उत्तालतालभेत्त्राय०
तमालश्यामलाकृते० गोपगोपीश्वराय० योगिने० कोटिसूर्यसमप्रभाय०
इलापतये० परंज्योतिषे० यादवेंद्राय० यदूद्वहाय० वनमालिने० पीतवाससे० १६
पारिजातापहारकाय० गोवर्धनचलोद्धर्त्रे० गोपाला० सर्वपालकाय० ६०

अजाय० निरंजनाय० कामजनकाय० कंजलोचनाय० [illegible]घ्ने० मथुरानाथाय० द्वारका
नायकाय० बलिने० वृंदावनांतसंचारिणे० तुलसीदामभूषणाय० स्यमंतकमणिर्ह
र्त्रे० नरनारायणात्मकाय० कुब्जाकृष्टांबरधराय० मायिने० परमपूरुषाय० मुष्टि
कासुरचाणूरमल्लयुद्धविशारदाय० संसारवैरिणे० कंसारये० मुरारये० नरकांतका०
अनादये० ब्रह्मचारिणे० कृष्णाव्यसनकर्षकाय० शिशुपालशिरश्छेत्त्राय० दुर्योधन
कुलांतकाय० विदुराक्रूरवरदाय० विश्वरूपप्रदर्शकाय० सत्यवाकाय० सत्यसंक
ल्पाय० सत्यभामारताय० जयिने० सुभद्रापूर्वजाय० जिष्णवे० भीष्म
मुक्तिप्रदायकाय० जगद्गुरवे० जगन्नाथाय० वेणुनादविशारदाय०
वृषभासुरविध्वंसिने० बाणासुरकरांतकाय० युधिष्ठिरप्रतिष्ठा
त्रे० बर्हिबर्हावतंसकाय० पार्थसारथये० अव्यक्ताय० गीतामृता०
महोदधिराय० कालीयफणिमाणिक्यरंजितश्रीपदांबुजाय० दामो

अनंत
१७

द्राय० यज्ञभोक्त्रे० दानवेंद्रविनाशका० नारायणाय० परब्रह्मणे० पंनगाशन
वाहनाय० जलक्रीडासमासक्तगोपीवस्त्रापहारकाय० पुण्यश्लोकाय०
तीर्थकराय० वेदवेद्याय० दयानिधे० सर्वतीर्थात्मका० सर्वग्रहरूपिणे०
परात्पराय० इति कृष्णअष्टशतसमाप्तः॥ हडीकरोपनामकजनार्दनेनलि
खितं पूजासाहित्य

१ अनंतजोड	सुपारी
१ यज्ञोपवीत	नारळ
१ शेष	पुष्पं
१ कापूर	बुका
१ उद्बत्या	
१ पंचामृत	

१७